# भावविकारवाचकशब्दाः

## वि आर् मनोज्

भवतेः स्वपदार्थे भवनं भावः। सन्मात्रं भावलिङ्गं स्यादित्यभियुक्तोक्तेः। भावस्य विकाराः भावविकाराः। भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मस्वित्यमरोऽपि। परिणामो विकारः। वृद्धिविकासादयोऽल्पत्वदरिद्रत्वादयश्चात्रान्तर्भूताः। प्रकृते सत्तादिषट्को भावशब्देन विवक्षितः।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।। (ब्रह्मकाण्डम् - 123) इति हरिवचनानुसारेण चराचराणामभिव्यक्तये शब्दव्यवहारस्य अनुपेक्षणीयत्वादाविर्भावतिरोभावपर्यन्तेषु भावविकारेषु आविर्भावस्य जनिः सिद्धिरित्यादिभिः शब्दैस्तथा तिरोभावस्य मृत्युर्नाश इत्यादिभिश्शब्दैश्च व्यवहारोऽभ्युपगम्यते। एवमेव स्थितिः परिणतिः वृद्धिः क्षतिरित्यादितत्तच्छब्दवाच्याः तन्मध्यभावाः। तथा हि जायते अस्ति विपरिणमते वर्धते अपक्षीयते नश्यति इति षड् भावविकारा भवन्तीत्याचार्यो वार्ष्यायणिः।

निरुक्तकारस्ततो भावविकारान्प्रत्येकान्वर्णयित्वान्तेऽथ इम एव भावविकाराः सन्ति किं वान्येऽपीत्यपेक्षायामुपक्रमते - अतोऽन्ये भावविकारा एतेषामेव विकारा भवन्तीतिह स्माह इति। अर्थाद् अस्माद् भावविकारषट्काद्येऽन्ये भावविकारा लक्ष्यन्ते ते पृथक्पृथगत्यन्तभिन्ना अपि सन्तः एतेषामेव विकारा भवन्ति। तद्यथा जनिशब्दवाच्यो भावविकारोऽनेकैरवान्तरभेदैरनेकैः पर्यायैः यथा उद्भवति सम्भवति निष्पद्यत इत्येवमादिभिरभिव्यज्यते। तद्वदस्तिशब्दवाच्यो भावविकारोऽनेकप्रभेदभिन्नोऽनेकपर्यायवचनश्चास्ति विद्यते वर्तते इत्येवमादिभिरभिव्यक्तो भवति। तथा विपरिणमते जीर्यति विवर्तते इत्येवमादिभिः विपरिणमतिशब्दवाच्यो भावविकारोऽभिव्यज्यते। एवं वर्द्धतेशब्दवाच्यो वर्धते पुष्यति बर्हति इत्येवं प्रकारः। तथापक्षीयतिशब्दवाच्यो ध्वस्यति दलति विशीर्यते इत्येवं रूपः। अन्ते च विनश्यतिशब्दवाच्यो विनश्यति म्रियते विलीयते इत्येवमादिभिरभिव्यज्यते।

तथा चाचार्योऽभिप्रैति यदेते सर्व एव धातवो भाववचनास्तेषां सर्वेषामिहाध्ययने प्राप्ते शास्त्रातिगौरवभयादेतल्लक्षणमुत्सृष्टमिति। सोऽयमुपरिष्टादुक्तो लक्षणसङ्ग्रहोऽस्य लेखस्योपक्रमाय कल्पितः। यतो हि तत्पर्यायज्ञानमध्येतॄणां महते उपकाराय भविष्यतीति प्रतीमः। अतो भावविकारवाचकाः शब्दाः सावान्तरभेदाः अत्र प्रबन्धे प्रस्तोष्यन्ते। यास्कस्याचार्यस्य निरुक्तं दुर्गाचार्यकृतां तद् व्याख्यां काव्यॉश्चावलम्ब्यायं लेखः प्रस्तोष्यते।

**1. जनिः।** उद्भवति सम्भवति फलति निर्वर्तते प्ररोहति जायते उत्पद्यते राध्यति सिद्ध्यति निष्पद्यते राध्नोति साध्नोति इत्येते जनिबोधकाः पर्यायेण प्रयुज्यन्ते।

तदर्थं विवृण्वन् जायत इति पूर्वभावस्यादिमाचष्टे नापरभावमाचष्टे न प्रतिषेधतीति यास्कः। पूर्वभावो नाम प्रादुर्भावस्यादिः। प्रादुर्भावश्चोपक्रमप्रभृत्यपवर्गपर्यन्तः। यथा वा बीजावपनात्प्रसवपर्यन्तम्। अत एव पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति पचतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तमितीतः पूर्वत्र निरुक्ते प्रस्तुतम्। उपक्रमश्च जायमानस्यानवधृतरूपं बोधयति। तस्यामवस्थायां किमपि जायत इत्येतदनुमानगम्यं भवति। अपवर्गस्तावद् भूतसामान्ये निष्ठान्तशब्दवाच्यो भवति। यथा जात इति। तस्याञ्चावस्थायां नासज्जायत इति न्यायेन विद्यमानमपि अपरं भावमस्तित्वरूपमस्ति भवति विद्यते इत्येतच्छब्दवाच्यं नाचष्टे। प्रत्युत जायते इत्येवोच्यते जनेरपरिपूर्णत्वात्। अत एवापवर्गस्तावद् भूतसामान्ये निष्ठान्तशब्दवाच्यो भवति यथा जात इत्युपरिष्टादवोचाम। अत एवानवधृतरूपं हि तस्यामवस्थायां तद्भवत्यनुमानगम्यं किमपि जायत इति। नापि प्रतिषेधति। अस्तित्वस्य प्रतिषेधं न करोतीत्यर्थः। यतो ह्यस्तित्वं प्रतिषेधन्ननात्मक एव स्याद् कमालम्ब्य जायेत। तदवधारणकालस्योपस्थितत्वाच्चेति दुर्गाचार्यः। सर्वमेतत्सङ्गृह्योक्तं जायत इति पूर्व-भावस्यादिमाचष्टे नापरभावमाचष्टे न प्रतिषेधति इति। जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भव इत्यमरो जनिपर्यायानाह।

उद्भवति सम्भवति फलति निर्वर्तते प्ररोहति जायते उत्पद्यते राध्यति सिद्ध्यति निष्पद्यते राध्नोति साध्नोति इत्येतेषु जनिबोधकेषु पर्यायेषु उद्भवत्यादिप्ररोहतिपर्यन्ताः भौव्वादिकाः। आद्यौ उद् सम् पूर्वकाद् भू सत्तायाम् (भ्वा.1) इत्यस्मान्निष्पन्नौ। कालिदासकृतौ कुमारसम्भवशब्दोऽत्र दृष्टान्तः। सम्भवशब्दस्यात्रोद्भवो जनिरर्थः। तथा हि काव्ये - तदिच्छामो विभो सृष्टं सेनान्यं तस्य शान्तये। कर्मबन्धच्छिदं धर्मं भवस्येव मुमुक्षवः।। (कुमारसम्भवम् - 2.51) इति देवैः प्रार्थितो ब्रह्मा अभ्यनुजानाति - सम्पत्स्यते वः कामोऽयं कालः कश्चित्प्रतीक्ष्यताम्। न त्वस्य सिद्धौ यास्यामि सर्गव्यापारमात्मना।। (कुमारसम्भवम् - 2.54) इति। सिद्धिशब्दोऽप्यत्र तमेवार्थमाख्यातुं प्रयुक्तो दृश्यताम्। फलति इति फल निष्पत्तौ (भ्वा.530) इत्यस्मान्निष्पन्नः। भक्तिस्त्वयि स्थिरतरा भगवन्यदि स्याद्दैवेन नः फलति दिव्यकिशोरमूर्तिरिति लीलाशुकः (कृष्ण.107)। निर्वर्तत इति निरुपसर्गपूर्वकाद् वृतु वर्तने (भ्वा.758) इत्यतो निष्पद्यते। प्ररोहतीति प्रपूर्वात् रुह बीजजन्मनि प्रादुर्भावे च (भ्वा.860) इत्यतो निष्पद्यते। न जातु वैनायकमेकमुद्धृतं विषाणमद्यापि पुनः प्ररोहतीति माघः (शिशु.1.60)।

अथ जायत इत्यारभ्य निष्पद्यते इति यावत् दैवादिकाः। जायत इति जनी प्रादुर्भावे (दिवा.1150) इत्यस्य रूपम्। असंशयं मृत्युरिति प्रजानतो नरस्य रागो हृदि यस्य जायत इत्यश्वघोषः (बुद्ध.4.99)। उत्पद्यत इति उत्पूर्वात् पद गतौ (दिवा.1170) इत्यस्मान्निष्पद्यते। राध्यति इति राधोऽकर्मकाद्वृद्धावेव (दिवा.1181) इत्यस्मान्निष्पन्नः। दैवं पर्यालोचयतीत्यर्थे विप्रश्ने आयत्तौ पाके च राध्यतीति प्रयोगो दृश्यते। सिद्ध्यति इति षिधु संराद्धौ (दिवा.1193)

इत्यस्य रूपम्। सिद्धे निर्वृत्तनिष्पन्नावित्यमरः। निष्पद्यते इति निरुपसर्गपूर्वात् पद गतौ (दिवा.1170) इत्यतो निष्पन्नः। शब्दो निष्पद्यत इत्यादौ प्रकृतिप्रत्ययाद्यन्वयेन वाक्येषु प्रयोक्तुं योग्यस्य शास्त्रीयस्य शब्दस्य निष्पत्तिरर्थः। अत्र प्रकृतिप्रत्ययाः कल्पिताः प्रक्रियालाघवार्थम्। नाम शब्दोऽस्त्येव। भविष्यति च। शास्त्रीयप्रक्रियाद्वारा निष्पादनेन सम्प्राप्तिर्नाम तच्छब्दावगमो लक्षितः। एतेन शब्दस्य नित्यत्वहानिः नास्ति। प्रयोगनैरन्तर्यात्। अत एव पूर्वापरीभूतं भावमाख्यातेनाचष्ट इति सङ्गतार्थम्। अन्त्यौ राध्नोति साध्नोति इत्येतौ राध साध संसिद्धौ (स्वा.1263, 1264) इत्येतयो रूपे। अन्नरन्धनमित्यादावन्नस्य तण्डुलेभ्यो विक्लिन्नस्योदनस्य पाकद्वारा सम्प्रातिरर्थः।

2. **स्थितिः।** भवति मठति वर्तते स्थलति तिष्ठति अवतिष्ठते वसति आस्ते अस्ति विद्यते ध्रियते क्षियति इत्येते स्थितिबोधकाः पर्यायेण प्रयुज्यन्ते।

स्यादास्या त्वासना स्थितिरित्यमरः। स्थितिः सत्ता। सतो भाव इत्यर्थः। द्रव्यगुणकर्मवृत्तौ कालसम्बन्धेन विद्यमानतायाञ्च प्रयुज्यते। उत्पन्नस्य सत्वस्यावधारणं सत्तेति निरुक्तम्। न विपरिणाममुत्तरकालिकमाचष्टे अपूर्णत्वात्। न तं प्रतिषेधति उपस्थितत्वादिति तद्व्याख्याने दुर्गाचार्यः।

भवति मठति वर्तते स्थलति तिष्ठति अवतिष्ठते वसति आस्ते अस्ति विद्यते ध्रियते क्षियति इत्येतेषु स्थितिबोधकेषु पर्यायेषु भवत्यादिवसतिपर्यन्ताः भ्वादौ। ततो द्वावादादिकौ। विद्यत इति दिवादौ। अन्त्यौ तौदादिकौ। भवतीति भू सत्तायाम् (भ्वा.1) इत्यस्य रूपम्। प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मेति कालिदासः (मेघ.2.30)। मठति इति मठ मदनिवासयोः (भ्वा.332) इत्यतो निष्पन्नः। वर्तते इति वृतु वर्तने (भ्वा.758) इत्यस्य रूपम्। हृदि परं न बहिः खलु वर्तते सखि यतस्तव एव विषद्यत इति श्रीहर्षः (नैष.4.108)। स्थलति इत्येतत् ष्ठल स्थाने (भ्वा.837) इत्यतो निष्पन्नम्। तिष्ठति इति ष्ठा गतिनिवृत्तौ (भ्वा.929) इत्यस्मान्निष्पन्नः। अयं स ते तिष्ठति सङ्गमोत्सुको विशङ्कसे भीरु यतोऽवधीरणामिति कालिदासः (शाकु.3.12)। अवतिष्ठत इत्यत्रावपूर्वः ष्ठा गतिनिवृत्तौ (भ्वा.929)। ‘समवप्रविभ्यः स्थः’ (पा.सू.1.3.22) इत्यात्मनेपदम्। क्षणमप्यवतिष्ठते श्वसन्यदि जन्तुर्ननु लाभवानसाविति कालिदासः (रघु.8.87)। वसति इत्यत्र वस निवासे (भ्वा.1006) इति धातुः। हृदये वसतीति मत्प्रियं यदवोचस्तदवैमि कैतवमिति कालिदासः (कुमा.4.9)। आस्ते इति आस उपवेशने (अदा.1022) इत्यस्मान्निष्पन्नः। यस्ते नवः पल्लवितः कराभ्यां स्मितेन यः कोरकितस्तवास्त इति श्रीहर्षः (नैष.3.121)। अस्ति इति अस भुवि (अदा.1066) इत्यस्य रूपम्। हृदय एव तवास्ति स वल्लभस्तदपि किं दमयन्ति विषीदसीति श्रीहर्षः (नैष.4.108)। विद्यते इति विद सत्तायाम् (दिवा.1172) इत्यस्य रूपम्। अवाप्यते वा किमियद्भवत्या चित्तैकपद्यामपि विद्यते य इति श्रीहर्षः (नैष.3.63)। ध्रियते इति धृङ् अवस्थाने (तुदा.1413) इत्यस्य रूपम्। द्वारि ध्रियते

रामो दिदृक्षते सत्यपूतं त्वामिति हरदत्तसूरिः (राघव.1.47)। क्षियतीति क्षि निवासगत्योः (तुदा.1408) इत्यतो निष्पन्नः।

3. **परिणतिः।** जीवति बलति श्वसिति अनिति अन्यते ऊर्जयति प्राणिति समनिति उदनिति व्यनिति अपानिति आतङ्कति कठति क्षञ्जयति विवर्तते कल्पते परिणमति परिणमते सम्पद्यते मस्यति इत्येते परिणतिबोधकाः पर्यायेण प्रयुज्यन्ते।

परिणामो विकार इति प्रकृतेरन्यथाभावे। विपूर्वः डुकृञ् करणे (तना.1473) इत्यस्माद् 'भावे' (पा.सू.3.3.18) इति घञ्। परिणामो विकारे द्वे इत्यमरः। परिणमत इत्यप्रच्यवमानस्य तत्वाद्विकारमिति यास्कः। अप्रच्यवमानस्येत्यस्य तत्वादपभ्रश्यमानस्येत्यर्थः। तद्भावस्तत्वम्। तत्वात्तद्भावादस्तित्वात्पुरुषत्वाद्वा विकारं विक्रियामात्रं ब्रवीति। न वृद्धिमाचष्टे अपूर्णत्वान्न च तां प्रतिषेधति उपस्थितत्वादिति दुर्गाचार्यः। परिणामो विकारो द्वे समे विकृतिविक्रिये इत्यमरः।

तत्राद्या षट् जीवस्य परिणतिं बोधयन्ति। वाङ्मनःप्राणकरणग्रामानुप्रविष्टे ब्रह्मणि। प्राणान् क्षेत्रज्ञरूपेण धारयन् जीव उच्यते। घटावच्छिन्नाकाशवच्छरीरत्रितयावच्छिन्ने चैतन्ये। जीवोऽसुधारणमित्यमरः। जीवति बलति श्वसिति अनिति अन्यते ऊर्जयति इत्येतेषु षट्स्वाद्यौ भ्वादी। अपरावादादिकौ। उपान्त्यो दिवादिः। अन्त्यश्चुरादिः। जीवतीति जीव प्राणधारणे (भ्वा.562) इत्यस्मान्निष्पन्नः। म्रियते म्रियमाणे या त्वयि जीवति जीवतीति हर्षदेवः (नागा.4.17)। बलति इति बल प्राणने धान्यावरोधे च (भ्वा.841) इत्यस्य रूपम्। श्वसितीति श्वस प्राणने (अदा.1070) इत्यस्मान्निष्पन्नः। अथ कले कलय श्वसिति स्फुटं चलति पक्ष्म चले परिभावयेति श्रीहर्षः (नैष.4.113)। अनिति इति अन प्राणने (अदा.1071) इत्यतो निष्पद्यते। अन्यते इति अन प्राणने (दिवा.1176) इत्यस्माज्जायते। अण इति पाठान्तरम्। अतः पक्षे अण्यते। ऊर्जयति इति ऊर्ज बलप्राणनयोः (चुरा.1550) इत्यस्य रूपम्।

ततः प्राणिति समनिति उदनिति व्यनिति अपानिति इत्येते पञ्च प्राणवृत्तिषु प्रयुज्यन्ते। पुंसि भूम्न्यसवः प्राणा इत्यमरः। प्राणानां वृत्तिर्व्यापारः प्राणवृत्तिः। पञ्चवृत्तिके देहस्थे वायौ। यथाक्रमं प्र सम् उद् व्य (वि+अ) अप इत्येवम्पूर्वकस्य अन प्राणने (अदा.1071) इत्यस्यामूनि रूपाणि। प्राणितीत्यत्र 'अनितेः' (पा.सू.8.4.19) इति णत्वम्। प्राणोऽपानः समानश्चोदानव्यानौ चेति पञ्च वायवः। हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले। उदानः कण्ठदेशे स्याद्व्यानः सर्वशरीरगः इति तत्स्थानानि। अन्नप्रवेशनं मूत्राद्युत्सर्गोऽन्नविपाचनम्। भाषणादिनिमेषादि तद्व्यापाराः क्रमादमी।। इति तत्कर्माणि।

तत आतङ्कति कठति क्षञ्जयति इति त्रयः कृच्छ्रजीवे प्रयुज्यन्ते। स्यात्कष्टं कृच्छ्रमित्यमरः। एष्वाद्यौ भ्वादी। अन्त्यश्चुरादिः। आतङ्कति इति आ तकि कृच्छ्रजीवने (भ्वा.118) इत्यस्य रूपम्। कठति इति कठ कृच्छ्रजीवने (भ्वा.333) इत्यतो जायते। क्षञ्जयतीति क्षजि कृच्छ्रजीवने (चुरा.1622) इत्यस्मान्निष्पन्नः। क्वचित् छजि इति पाठः। तन्मते छञ्जयति।

अन्याश्च विवर्तते कल्पते परिणमति परिणमते सम्पद्यते मस्यति इत्येते पञ्च परिणामसामान्ये प्रयुज्यन्ते। परिणामो विकार इत्यमरः। परिणाममात्रमिह विवक्षितम्। एतेष्वाद्यास्त्रयो भौव्वादिकाः। अन्त्यौ दिवादी।

विवर्तते इति विपूर्वस्य वृतु वर्तने (भ्वा.758) इत्यस्य रूपम्। कल्पते इति कृपू सामर्थ्ये (भ्वा.762) इत्यस्मान्निष्पन्नः। परिणमति इति परिपूर्वस्य णम प्रह्वत्वे शब्दे च (भ्वा.982) इत्यस्य रूपम्। परिणमते इति परिपूर्वात् णम प्रह्वत्वे शब्दे च (भ्वा.982) इत्यतो निष्पन्नः। सम्पद्यते इति सम्पूर्वस्य पद गतौ (दिवा.1170) इत्यस्य रूपम्। मस्यतीति मसी परिणामे (दिवा.1222) इत्यस्मान्निष्पद्यते। मसी स्थाने समी इत्येके। तन्मते सम्यति।

4. **वृद्धिः।** एधते विकचते स्फोटते वठति विजृम्भते फुल्लति क्रमते क्रम्यते स्फायते स्फीतीभवति आप्यायते प्यायते उन्मीलति पीवति मीवति तीवति नीवति वंहते मंहते पूषति पोषति बर्हति बृंहति वर्धते प्रथते प्रसते विपोलति विकसति श्वयति तौति तवीति पुष्यति आपूर्यते पुष्यति ऋध्यति ऋध्नोति स्फुटति विपोलयति स्थूलयते महीयते इत्येते वृद्धिबोधकाः पर्यायेण प्रयुज्यन्ते। स्फातिर्वृद्धावित्यमरः।

वर्धत इति स्वाङ्गाभ्युच्चयं सांयौगिकानां वार्थानाम् इति निरुक्तम्। दुर्गाचार्यस्तमित्थं प्रपञ्चयति - व्याख्याने वर्धत इत्येष शब्दः स्वेषामङ्गानां शिरोग्रीवाबाहूदरादीनामभ्युच्चयमभ्युच्चिततां (सञ्चयं) ब्रवीति। सांयौगिकानां संयोगजनितानां वा अर्थानां हिरण्यधान्यादीनामभ्युच्चयं ब्रवीतीति पूर्वेणाभिसम्बध्यतेऽर्थवशात्। तत्प्रयोगमाह वर्धते विजयेनेति वा वर्धते शरीरेणेति वेति निरुक्ते। व्याख्याने तावदत्राद्यमवरोहणक्रमेण सांयौगिकेषूदाहरणं द्वितीयं स्वाङ्गाभ्युच्चये। अत्र वर्धत इति ब्रुवाणो नापक्षयमाचष्टेऽपूर्णत्वात्। नापि तं प्रतिषेधति उपस्थितत्वादिति।

वठत्यादि श्वयत्यन्ताः भौव्वादिकाः। तौति तवीतीत्येतौ छान्दसौ। पुष्यति इत्यारभ्य मेध्यत्यन्ताः दैवादिकाः। ऋध्नोतिः स्वादौ। स्फुटतिः तुदादौ। ततो द्वौ चुरादी। अन्त्यः कण्ड्वादिः। एधत इति एध वृद्धौ (भ्वा.2) इत्यस्य रूपम्। विकचत इति विपूर्वात् कच बन्धने (भ्वा.168) इत्यस्मान्निष्पन्नः। स्फोटते इति स्फुट विकसने (भ्वा.260) इत्यतो जायते। वठति इति वठ स्थौल्ये (भ्वा.331) इत्यस्मान्निष्पद्यते। विजृम्भत इति विपूर्वस्य जृभि गात्रविनामे (भ्वा.389) इत्यस्य रूपम्। फुल्लति इति फुल्ल विकसने (भ्वा.433) इत्यस्मान्निष्पद्यते। क्रमते - क्रम्यते इति क्रमु पादविक्षेपे (भ्वा.473) इत्यस्य रूपम्। 'अनुपसर्गाद्वा' (पा.सू.1.3.43) इति पक्षे आत्मनेपदम्। 'वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः' (पा.सू.3.1.70) इति शब्विषये श्यन् विकल्पः। स्फायते इति स्फायी वृद्धौ (भ्वा.487) इत्यतो निष्पद्यते। स्फीतीभवति इति स्फायी वृद्धौ (भ्वा.487) इत्यस्मात् क्तप्रत्यये 'स्फायः स्फी निष्ठायाम्' (पा.सू.6.1.22) इति स्फीभावे स्फीतशब्दाद् अभूततद्भावे इत्यनुवर्तमाने 'कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः' (पा.सू.5.4.50) इति च्विः। ततश्च्व्यन्ताद् भवतेरनुपयोगः। आप्यायते इत्यत्र ओप्यायी वृद्धौ (भ्वा.488) इति

धातुः। प्यायत इत्यत्रापि ओप्यायी वृद्धौ (भ्वा.488) इति धातुः। ओकारो धात्ववयवो नेति केचित्। तन्मते प्यायते इत्येतदपि तत एव धातोः निष्पन्नमवधेयम्। उन्मीलति इति उत्पूर्वस्य मील निमेषणे (भ्वा.517) इत्यस्य रूपम्। पीवति इत्यत्र पीव स्थौल्ये (भ्वा.563) इति धातुः। मीवति इति मीव स्थौल्ये (भ्वा.564) इत्यस्य रूपम्। तीवति इति तीव स्थौल्ये (भ्वा.565) इत्यतो जायते। नीवति इति णीव स्थौल्ये (भ्वा.566) इत्यस्मान्निष्पद्यते। वंहते इति बहि वृद्धौ (भ्वा.633) इत्यस्य रूपम्। क्वचित्_वंहते इति पठितं वबयोरभेदादित्यवधेयम्। मंहते इति महि वृद्धौ (भ्वा.634) इत्यतो भवति। पूषति इति पूष वृद्धौ (भ्वा.675) इत्यस्माज्जायते। पोषति इति पुष पुष्टौ (भ्वा.700) इत्यस्माद् भवति। बर्हति इति बृह वृद्धौ (भ्वा.735) इत्यस्य रूपम्। बृंहति इति बृहि वृद्धौ (भ्वा.736) इत्यस्मान्निष्पद्यते। वर्धते इति वृधु वृद्धौ (भ्वा.759) इत्यस्य रूपम्। प्रथत इति प्रथ प्रख्याने (भ्वा.765) इत्यस्माज्जायते। प्रसते इति प्रस विस्तारे (भ्वा.766) इत्यस्मान्निष्पद्यते। विपोलति इति विपूर्वः पुल महत्वे (भ्वा.842) इत्यस्य रूपम्। विकसति इति विपूर्वात् कस गतौ (भ्वा.861) इत्यतो निष्पन्नम्। श्वयति इति टुओश्वि गतिवृद्ध्योः (भ्वा.1011) इत्यस्माज्जायते। तौति तवीति इत्येतौ छान्दसं विदुरिति भट्टमल्लकोशः। पुष्यति इति पुष्प विकसने (दिवा.1123) इत्यस्य रूपम्। आपूर्यते इति आ पूरी आप्यायने (दिवा.1152) इत्यतो जायते। पुष्यति इति पुष पुष्टौ (दिवा.1183) इत्यस्य रूपम्। सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्यामिति कालिदासः (मेघ.2.17)। ऋध्यति इति ऋधु वृद्धौ (दिवा.1246) इत्यतो जायते। ऋध्नोति इति ऋधु वृद्धौ (स्वा.1272) इत्यस्य रूपम्। स्फुटति इति स्फुट विकसने (तुदा.1374) इत्यस्मान्निष्पन्नम्। ज्वलति पवनवृद्धः पर्वतानां दरीषु स्फुटति पटुनिनादैः शुष्कवंशस्थलीष्विति कालिदासः (ऋतु.1.25)। विपोलयति इत्यत्र विपूर्वः पुल महत्वे (चुरा.1602) इत्ययं धातुः। स्थूलयते इति स्थूल परिबृंहणे (चुरा.1905) इत्यतो जायते। महीयते इति महीङ् पूजायाम् (कण्ड्वादिः)। 'कण्ड्वादिभ्यो यक्' (पा.सू.3.1.27) इति यक्। 'सनाद्यन्ता धातवः' (पा.सू.3.1.32) इति यगन्तस्य धातुत्वाल्लडादयः।

उपयुक्तेषु वृद्धिपर्यायेषु विकचते स्फोटते विजृम्भते फुल्लति उन्मीलति विकसति पुष्यति स्फुटति इत्येते विशेषतः विकासेऽर्थान्मुकुलीभूतस्योत्फुल्लतायां गम्यमानायां प्रयुक्ता दरीदृश्यन्ते।

5. **क्षयः।** अपक्षयति चुट्टयति चुण्डते द्राडते दरिद्राति दीयते दलति दस्यति फलति क्रुञ्चति ह्रसति जिनाति लिश्यते विशीर्यते जारयति जायति जीर्यति झीर्यति जरति जृणाति जूर्यते कृश्यति कुञ्चति कूणयति मीलति मुकुलीभवति पुट्टयति पूयते ध्राडते शटति सायति सीदति सङ्कुचति स्फोटति स्मीलति तस्यति व्यृध्नोति व्यृध्यति क्षायति शीयते क्ष्मीलति इत्येते क्षयबोधकाः पर्यायेण प्रयुज्यन्ते।

अपक्षीयत इत्यनेनैव व्याख्यातः प्रतिलोममिति निरुक्तम्। यथैव हि स्वाङ्गैः स्वांयौगिकैर्वा द्रव्यैरुपचीयते तथैवापक्षीयते। इत्येवमुपचयप्रयोगः पूर्वनिर्दिष्टः स अपक्षीयत इत्यनेनैव प्रतिलोमं

विपरीतं व्याख्यातः। भवति हि वृद्धेः प्रतिलोममपक्षयः। प्रतिगतं लोम प्रतिलोमम्। तत्रापि नाचष्टे अपरभावं न वा प्रतिषेधतीति दुर्गाचायो व्याख्याति।

क्षयो बहुमुखः। क्वचिदुन्मीलितस्य निमीलनेन नाशोन्मुखतोच्यते। क्वचिज्जीवतः जराजीर्णतारूपः। अपरत्र पत्रफलमूलादिविशरणरूपः। क्वचिद्ध्रासतापातनरूपो यो नाशपूर्वभावी। एकत्र धनधान्याद्याढ्यस्य दारिद्र्यरूपः। अन्यत्र शक्तेरपक्षयरूपः। एवञ्च क्षयस्य नानाप्रकारतया तद्वाचकशब्दबाहुल्यात्त इह प्रसिद्धार्थकतामाश्रित्य वर्गीक्रियन्ते। तथा हि -

सङ्कोचार्थका षट् सार्वत्रिकाः - मीलति स्मीलति क्ष्मीलति सङ्कुचति कूणयति मुकुलीभवतीत्येते सङ्कोचार्थकाः पर्यायेण प्रयुज्यन्ते। एतेषु षट्स्वाद्यास्त्रयो भ्वादौ ततस्तुदादिश्चुरादिश्च। अन्त्यश्च्व्यन्तः। मीलति इति मील निमेषणे (भ्वा.517) इत्यस्य रूपम्। स्मीलति इति स्मील निमेषणे (भ्वा.519) इत्यतो निष्पद्यते। क्ष्मीलति इति क्ष्मील निमेषणे (भ्वा.520) इत्यतो निष्पन्नः। सङ्कुचति इति सम्पूर्वात् कुच सङ्कोचने (तुदा.1369) इत्यतो जायते। कूणयति इति कूण सङ्कोचने (चुरा.1689) इत्यस्य रूपम्। मुकुलीभवतीति मुकुलशब्दात् च्व्यन्ताद् भवतेरनुप्रयोगः।

क्षयावस्थासूचिकायां जरायां गम्यमानायामेते सप्त प्राचुर्येण प्रयुज्यन्ते - जीर्यति झीर्यति जूर्यते जृणाति जिनाति जरति जारयति। एतेषु सप्तसु आद्यास्त्रयो दिवादयः। ततो द्वौ क्र्यादी। अन्त्यौ चुरादी। विस्रसा जरेत्यमरः। जीर्यति इति जॄष् वयोहानौ (दिवा.1131) इत्यतो जायते। झीर्यति इति झॄष् वयोहानौ (दिवा.1132) इत्यस्मान्निष्पद्यते। जूर्यते इति जूरी हिंसावयोहान्योः (दिवा.1157) इत्यस्य रूपम्। जृणाति इति जॄ वयोहानौ (क्र्या.1495) इत्यस्मान्निष्पद्यते। जिनाति इति ज्या वयोहानौ (क्र्या.1500) इत्यस्य रूपम्। 'ग्रहिज्यावयिव्यधि' (पा.सू.6.1.16) इत्यादिना सम्प्रसारणम्। जरति इति जॄ वयोहानौ (चुरा.1815) इत्यतो जायते। 'आधृषाद्वा' (गणसूत्रम्) इति धृषधातुमभिव्याप्य विभाषितणिचो धातवः पठिताः। तत्रायं जरतिः। तेन णिजभावे जरति। णिचि जारयति इत्यग्रे वक्ष्यते। जारयति इति जॄ वयोहानौ (चुरा.1815) इत्यस्मान्निष्पद्यते। 'आधृषाद्वा' (गणसूत्रम्) इति धृषधातुमभिव्याप्य विभाषितणिचो धातवः पठिताः। तत्रायं जरतिः। तेन णिजभावे जरति इत्युपरिष्टादुदाहृतम्। प्रकृते णिचि जारयति।

विशरणसामान्ये एते नव प्रचुरं प्रयुज्यन्ते - द्राडते ध्राडते स्फोटति पूयते दलति फलति सीदति शीयते विशीर्यते। अन्त्यवर्जं सर्वे भ्वादयः। द्राडते इति द्राडृ विशरणे (भ्वा.287) इत्यस्मान्निष्पन्नः। ध्राडत इत्येतत् ध्राडृ विशरणे (भ्वा.288) इत्यस्मान्निष्पद्यते। शटतीति शट रुजाविशरणगत्यवसादनेषु (भ्वा.299) इत्यस्मान्निष्पद्यते। स्फोटति इति स्फुटिर् विशरणे (भ्वा.329) इत्यस्य रूपम्। पूयत इति पूयी विशरणे दुर्गन्धे च (भ्वा.484) इत्यस्य रूपम्। दलति इति दल विशरणे (भ्वा.548) इत्यतो जायते। फलति इति ञिफला विशरणे (भ्वा.516) इत्यस्माज्जायते। वीरोदात्तगुणोत्तरो रघुपतिः काव्यार्थबीजं मुनिर्वाल्मीकिः फलति स्म यस्य

चरितस्तोत्राय दिव्या गिर (अनर्घ.1.8) इति मुरारिप्रयोगे तु फलतीत्यस्याविर्भवतीत्यर्थः। इह तावदङ्कुरोद्गमपूर्वभावि फलविरणं गम्यते। सीदति इति षद्लृ विशरणगत्यवसादनेषु (भ्वा.855) इत्यस्य रूपम्। शीयते इत्येष शदलृ शातने (भ्वा.856) इत्यस्मान्निष्पद्यते। 'पाघ्राध्मास्थाम्नादाण्' (पा.सू.7.3.78) इत्यादिना शीयादेशः। 'शदेः शितः' (पा.सू.1.3.60) इत्यात्मनेपदम्। विशीर्णतायामयमिति कौमुद्याम्। विशीर्यते इत्येतद् विपूर्वस्य शॄ हिंसायाम् (क्र्या.1489) इत्यस्य कर्मणि रूपम्।

अल्पत्वसामान्ये एतेऽष्टौ प्रचुरं प्रयुक्ता अवलोक्यन्ते - कुञ्चति क्रुञ्चति चुण्डते ह्रसति लिश्यते कृश्यति पुट्टयति चुट्टयति। आद्याश्चत्वारो भ्वादयः। उपान्त्यौ दिवादी। अन्त्यौ चुरादी। कुञ्चतीति कुञ्च कौटिल्याल्पीभावयोः (भ्वा.185) इत्यस्मान्निष्पन्नः। क्रुञ्चतीति क्रुञ्च कौटिल्याल्पीभावयोः (भ्वा.186) इत्यतो निष्पद्यते। चुण्डते इति चुडि अल्पीभावे (भ्वा.325) इत्यस्य रूपम्। ह्रसति इति ह्रस शब्दे (भ्वा.711) इत्यस्माज्जायते। लिश्यते इति लिश अल्पीभावे (दिवा.1180) इत्यतो जायते। कृश्यति इति कृश तनूकरणे (दिवा.1228) इत्यतो निष्पद्यते। पुट्टयतीति पुट्ट अल्पीभावे (चुरा.1560) इत्यस्य रूपम्। चुट्टयतीति चुट्ट अल्पीभावे (चुरा.1561) इत्यस्य रूपम्।

दरिद्रत्वसामान्ये प्रचुरं प्रयुक्ता इमे अवलोक्यन्ते - दरिद्राति। व्यृध्यति। व्यृध्नोति। क्रमादेते अदादौ दिवादौ स्वादौ च भवन्ति। दरिद्राति इति दरिद्रा दुर्गतौ (अदा.1074) इति धातुः। व्यृध्यति इति विपूर्वः ऋधु वृद्धौ (दिवा.1272)। इत्यस्मान्निष्पन्नः। विगता ऋद्धिः व्यृद्धिः। 'इको यणचि' (पा.सू.6.1.77) इति यणादेशः। दारिद्र्यमर्थः। व्यृध्नोति इति विपूर्वः ऋधु वृद्धौ (स्वा.1247) इति धातुः।

अपक्षयसामान्ये प्रचुरं प्रयुक्ता दृश्यन्ते इमे सप्त - अपक्षयति क्षायति जायति सायति दीयते तस्यति दस्यति। आद्याश्चत्वारो भ्वादौ। ततस्त्रयो दिवादौ। अपक्षयति इति अपपूर्वस्य क्षि क्षये (भ्वा.236) इत्यस्य धातो रूपम्। क्षायति इति क्षै क्षये (भ्वा.914) इत्यतो जायते। जायति इति जै क्षये (भ्वा.915) इत्यस्मान्निष्पद्यते। सायतीति षै क्षये (भ्वा.916) इत्यतो निष्पन्नम्। 'धात्वादेः षः सः' (पा.सू.6.1.64) इति सत्वम्। दीयते इति दीङ् क्षये (दिवा.1135) इत्यस्माज्जायते। तस्यति इति तसु उपक्षये (दिवा.1213) इत्यतो भवति। दस्यति इति दसु च उपक्षये (दिवा.1214) इत्यस्माद्धातो जायते।

**6. नाशः।** उपरमति उद्वाति उद्वायति आरमति अप्येति म्रियते निर्वाति निर्वायति रिष्यति विलीयते विनश्यति विपद्यते विध्यायति विरमति जम्भयति नक्कयति प्रलीयते प्रमीयते प्रैति प्रध्वंसते पंसयति पण्डयति परैति पर्यवस्यति धक्कयति धरते सन्तिष्ठते समाप्नोति शाम्यति। इत्येते नाशबोधकाः पर्यायेण प्रयुज्यन्ते।

विनाशं वर्णयति - विनश्यतीत्यपरभावस्यादिमाचष्टे न पूर्वभावमाचष्टे न प्रतिषेधतीति निरुक्ते। विनाश एवात्रापरभावस्तस्यादिमुपक्रमप्रभृत्यपवर्गपर्यन्तमाचष्टे विनश्यतीति। तस्याञ्चावस्थायां विद्यमानमपि पूर्वभावमपक्षीयतेरर्थं नाचष्टे न प्रतिषेधतीति सर्वं निरवद्यमिति दुर्गाचार्यः।

विनाशो बहुमुखः। क्वचिदभिव्यक्तपदार्थानामदर्शनरूपः। क्वचिच्च तदवस्थापगमरूपः। क्वचिज्जीवतां मृत्युरूपः। क्वचिच्च ज्वलतां दीप्तिनिर्वपनरूपः।

विनाशसामान्ये प्रचुरं प्रयुक्ता इमे त्रयोदश - प्रध्वंसते धरते अप्येति विलीयते प्रलीयते विनश्यति रिष्यति विपद्यते जम्भयति नक्कयति धक्कयति पण्डयति पंसयति। विनाशः स्याददर्श नमित्यमरः। आद्यौ भ्वादी। द्वितीयोऽदादिः। ततः पञ्च दैवादिकाः। तत आन्तं चौरादिकाः। प्रध्वंसत इत्यत्र प्रपूर्वः ध्वंसु अवस्रंसने गतौ च (भ्वा.755) इति धातुः। धरते इत्यत्र धृङ् अवध्वंसने (भ्वा.961) इत्ययं धतुः। अप्येति इति अपिपूर्वात् इण् गतौ (अदा.1046) इत्यस्माज्जायते। विलीयत तथा प्रलीयते इत्यत्र विपूर्वः तथा प्रपूर्वकश्च लीङ् श्लेषणे (दिवा.1140) इति धातुः। विनश्यति इति विपूर्वात् णश अदर्शने (दिवा.1195) इत्यस्माज्जातः। रिष्यति इति रिष हिंसायाम् (दिवा.1232) इत्यस्य रूपम्। विपद्यत इत्येतत् विपूर्वात् पद गतौ (दिवा.1170) इत्यस्माज्जायते। ममैव शोकेन विदीर्णवक्षसा त्वया विचित्राङ्गि विपद्यते यदीति श्रीहर्षः (नैष.1.140)। जम्भयति इत्यत्र जभि नाशने (चुरा.1717) इत्ययं धातुः। नक्कयति इत्येदद्रूपं नक्क नाशने (चुरा.1594) इत्यतो निष्पन्नः। धक्कयति इति धक्क नाशने (चुरा.1595) इत्यस्माज्जायते। पण्डयति इति पडि नाशने (चुरा.1616) इत्यस्य रूपम्। पंसयति इत्येतत्पसि नाशने (चुरा.1617) इत्यस्माज्जायते।

मरणवाचकाः इमे दश प्रयुज्यन्ते - विरमति आरमति उपरमति सन्तिष्ठते परैति प्रैति प्रमीयते पर्यवस्यति समाप्नोति म्रियते स्यात्पञ्चता कालधर्मो दिष्टान्तः प्रलयोऽत्ययः। अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनोऽस्त्रियामित्यमरः। आद्याश्चत्वारो भ्वादयः। ततो द्वावदादी। ततश्च द्वौ दिवादी। उपान्त्यः स्वादी। अन्त्यश्च तुदादिः।

विरमति आरमति उपरमति इत्येते यथाक्रमं वि आङ् तथा उपपूर्वकात् रमु क्रीडायाम् (भ्वा.854) इत्यस्मान्निष्पन्नाः। उभयत्रापि ‘व्याङ्परिभ्यो रमः’ (पा.सू.1.3.83) इति परस्मैपदम्। विरमति महाकल्पे नाभीपथैकनिकेतनस्त्रिभुवनपुरः शिल्पी यस्य प्रतिक्षणमात्मभूरिति मुरारिः (अनर्घ.1.2)। उपरमति इत्यत्र ‘उपाच्च’ (पा.सू.1.3.84) इति परस्मैपदम्। सन्तिष्ठते इत्येतत् सम्पूर्वात् ष्ठा गतिनिवृत्तौ (भ्वा.929) इत्यस्मान्निष्पन्नः। ‘समवप्रविभ्यः स्थः’ (पा.सू.1.3.22) इत्यात्मनेपदम्। परैति प्रैति इत्येतौ परा तथा प्रपूर्वकाच्च इण् गतौ (अदा.1046) इत्यस्मान्निष्पन्नौ। तदद्य ते वन्यफलाशिनः परं परैति कार्श्यं यशसा समं वपुरिति भारविः (किरा.1.39)। प्रमीयते इत्यत्र प्रपूर्वो मीङ् हिंसायाम् (दिवा.1138) इति धातुः। अत्र हिंसाशब्देन हिंसाफलं प्राणविश्लेषोऽभिधीयते इति धातुवृत्तौ। हिंसात्र प्राणवियोगः इति

कौमुदी। पर्यवस्यति इत्यत्र परि अव इत्युपसर्गद्वयपूर्वः षोऽन्तकर्मणि (दिवा.1148)। समाप्नोति इति सम्पूर्वः आप्लृ व्याप्तौ (स्वा.1261)। म्रियते इति मृङ् प्राणत्यागे (तुदा.1404)। म्रियते म्रियमाणे या त्वयि जीवति जीवतीति हर्षदेवः (नागा.4.17)।

तेजसो विरतौ इमे षट् प्रयुज्यन्ते - विध्यायति निर्वायति उद्वायति उद्वाति निर्वाति शाम्यति। आद्यास्त्रयो भ्वादौ। उपान्त्यावदादौ। अन्त्यो दिवादिः। विध्यायति इति विपूर्वस्य ध्यै चिन्तायाम् (भ्वा.909) इत्यस्य रूपम्। निर्वायति तथा उद्वायति इत्यत्र यथाक्रमं निर् उत् इत्युपसर्गपूर्वः ओवै शोषणे (भ्वा.922) इति धातुः। उद्वाति तथा निर्वाति इत्यत्र यथाक्रमं उत् निर् पूर्वः वा गतिगन्धनयोः (अदा.1051) इति धातुः। शाम्यति इति शमु उपशमे (दिवा.1202) इत्यस्य रूपम्। 'शमामष्टानां दीर्घः श्यनि' (पा.सू.7.3.74) इति दीर्घः।

व्याकरणशास्त्रे भावशब्दस्य धात्वर्थोऽर्थः। तदपीह युक्तमाख्यातुम्। धातुना योऽर्थोऽभिधीयते स एव भावः। तदुक्तं स्वपदार्थे भवनं भाव इति। प्रबन्धे चास्मिन् यत्किञ्चिदुपष्टम्भकमादाय य एते धातवोऽस्मिन्नर्थे प्रयुज्यन्ते इति वक्तुं सुशकास्ते परामृष्टाः। यदतोऽन्ये धातुपाठेऽन्यत्र वा एतमेवार्थमुपस्थापयन्तोऽत्र योजयितुमुचिताः।

## उपयुक्तग्रन्थाः


अनर्घराघवम्।
किरातार्जुनीयम्।
कुमारसम्भवम्।
कृष्णकर्णामृतम्।
नागानन्दम्।
नैषधीयचरितम्।
बुद्धचरितम्।
भट्टिकाव्यम्।
माधवीयधातुवृत्तिः।
मेघदूतम्।
पातञ्जलयोगसूत्रम्।
रघुवंशः।
रामायणम्।
राघवनैषधीयम्।
वाक्यपदीयब्रह्मकाण्डम्।
वाक्यपदीयसाधनसमुद्देशः।
विवेकचूडामणिः।
शाकुन्तलम्।
शिशुपालवधम्।
साङ्ख्यकारिका।
सिद्धान्तकौमुदी सव्याख्या सपरिशिष्टा।